This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांस्ते। शंसेरिति कर्मण्यतीतारे तः। सर्वत्र समन्वादीनां योगपंशे सतं अतोदं ब्रोमीसर्थः॥ इदं मंगलप
घं गुर्वक्षरद्वयात्मक पादद्वं श्री नामधेयं दस्मं १४

(नं. ९९)

इदं गुर्वक्षरात्मक पादद्वं श्री नामधेयं दस्मु पद्यद्वयंतु नापादांते यतिनियमेन पद मध्येयतिप्रसंगात्

श्रीगणेशाय नमः ॥ देवं वंदे ॥ इदं मंगलपद्यमुत्तार्धं सर्वार्थस्य वैपरीत्ये
न पुनः पाठे पद्यस्फूर्तिः ॥ प्राणिनाथाचार्यवर्य श्रीमद्गुरुपदांबुजं ॥ प्रणम्य
शिरसा सूत्रं आद्गुणेरणाविति ॥१॥ गजसूत्रमिदं पूर्वैर्व्याख्यातमपि वि
स्तरात् ॥ परीक्षयंतः स्वमतिं केचिद्व्याचक्षते पुनः ॥२॥ अत्र सूत्रवार्तिकभा
ष्यग्रंथेषु कर्मपदानि श्रूयंते तानि व्यारव्यपराण्येव ॥ उत द्वितीयवाक्यपेक्रि
यापराणि तृतीयवाक्ये व्यारव्यपराणीति ॥ एवं उभयपराणि वेति संशयः॥
तत्र व्यारव्यपराण्येवेति वैयटमतं ॥ वाक्यभेदेन उभयपराणीति दीक्षितमतं
॥ न ज्येत्स्तु वैय्यटमतमेव समर्थितमिति न वैय्यटमताश्रिष्यते नव्यमतं।
वाक्यवैयर्थ्यापत्तेरिति ॥ यद्यपि भाष्यं वदतिचेन्नः नदीवदतीसत्रतत्सत्ता

Acc. No. ~~4499~~. M-1904
Title - शब्देन्दुशेखरविवृत्तिसंग्रह. "अरणौ" इति सूत्रस्य.
Author - प्राणिनाथाचार्य शिष्य (?)
Date - ?
Sub - व्याकरण.
Folio - 18.
Xerox - 34.

KKSU LIBRARY RAMTEK 441 106 M-1904 Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेरणौ·

॥२॥ नास्ति॥ क्रियाभेदात्॥ तद्धारणाय चावश्यमावश्यकं तथापि लक्ष्यानुरोधेनाणौ
यत्कर्म तदेव कर्मेति भाष्येणन्यचत्तस्स्तासत्वे एवेन तत्सूत्रमवृत्तिरिति बोध्यं॥
व्याख्यानादिति॥ णिवाच्यक्रियायां णिवाच्यक्रियानिरूपितकर्तृत्वासंभवरूपं व्या
ख्यानमत्र बोध्यं॥ आकडारेति नियमेन कर्मसंज्ञाविशिष्टकर्तृसंज्ञाविशिष्टाभे
दस्य बाधात् कारकपरत्वादिनोपि कर्मपदस्य फलाश्रयलक्षणाया आवश्यकत्वे
न शाब्दाधिकाराश्रयणमपि उभयोरविशिष्टं॥ किंच यत्स्यग्रहणात् सदृशनेन सर्व
प्रकारानबुद्धिस्थफलाश्रयमात्रपरामर्शात् न शाब्दाधिकाराश्रयणं इति बोध्यं॥
एवं गतिबुद्धीति सूत्रेपि अणौ यः कर्ता स णौ कर्म स्यादिति वाक्ये सग्रहणे न स्यत्तं
त्रमात्रं परामृश्यते॥ अन्यथा कर्तृसंज्ञाविशिष्टमुद्दिश्य कर्मसंज्ञाविधानेन गसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ धर्मसंज्ञाविधा
२ नेतुधर्मा जल
२ सान्द्रि ध्यानेन
उतिताः
स्मृति प्रतिबं
धा ४

स्यामपदसंज्ञयोरिव समावेशो धर्मत्वस्य समानत्वेन पदद्विकस्यैव तद्दिग्गमनात्‌ नौश
ब्दनगमनयदि सादिप योगाविलीयेरन् ॥ अत एव तत्सूत्रस्थ मनोरमायां प्रकृतसू
त्रे विलय वर्तुरीप्सिततमम् इति सूत्रे वर्त पदस्य स्वतंत्रे लक्षणा उक्ता ॥ तत्र सयतृणा
भावात् इदस्य पि बोध्यं ॥ अं [illegible] दे इति ॥ अन्यथा हि धर्मज्ञाणामेवैतत्सू
त्रोदाहरणत्वस्यादिति भावः ॥ कुत्रेति ॥ धेति बोध्यं ॥ स्वमते कुत्रेत्यस्य ध्रांदसत्वात्
॥ यत्र व्याप्येति ॥ उद्देश्यतावच्छेदक सामानाधिकरण्येन धर्मसंज्ञान्वयितस्य
तत्र विवक्षितत्वादिति भावः ॥ अन्यथा ह्रोतेर्व्यापारद्वयार्थकत्वे कृष्णं गोपी ह्रोतेद
सत्र सकर्मकत्वात् तं गोपी ह्रापयतीसत्र परस्मैपदं न स्यादिति भावः ॥ अर्थभेदा
च्छब्दभेद इतितु अत्र सूत्रे आश्रयितुमशक्यमिति बोध्यं ॥ उदाहरणमिति ॥ एवं च
मेव कर्तृत्वात्सिद्धमिति द्वितीयमपद सूत्रस्थं भाष्यमपि मानं ॥ [illegible] अत्र सूत्रेमि
नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ यमहृयं प्रहर्षितं ॥ अणौ यत्कर्म णौ चेत्तदेव कर्म अणौ यत्कर्मव्वारकं णौ चेत्
स कर्ता तदा कर्मवद्भावेन आत्मनेपदमेव भवति । न प्रत्ययांतरं द्वितीयो नियमः ॥
कर्मवद्भावेन आत्मनेपदं भवति चेत् अणौ यत्कर्म णौ चेत्तदेव कर्म अणौ यत्कर्मव्वा
रकं णौ चेत्स कर्ता तत्रैवेति द्वितीयनियम उक्तः ॥ पूर्वविप्रतिषेधवचनाभावे तु तत्र प
रस्मैपदबाधनार्थमस्य विध्यायकत्वसंभवान्नियामकत्वोक्तेरसंगतिः स्पष्टैव ॥ भुजोऽ
नवन इति सूत्रस्वारस्यं च यदि स्यापि सूत्रस्य कर्मस्थक्रियकेष्वेव प्रवृत्तिः अकर्मकेष्वेवच
प्रवृत्तिरिति तदा नायोर्बोधःस्य ॥ णिचः स्थितिरिति ॥ मुख्यप्रयोजकव्यापारनिवृत्तावपि स्वव्या
पारे एव तत्त्वारोपात्प्रयोजकबोधे प्रयोजकव्यापारत्वेन रूपेण तस्याभानात्तन्निवृत्तिरिति भावः
यथावा सूत्रे लिंगवचनस्यातंत्रत्वेऽपि स्त्रीप्रत्ययसुबादिप्रत्ययउपेक्षादिशङ्कानामा
चार्यैः कृता पुनर्न निवर्तते इति न्यायात्स्थितिरिति भावः ॥ यद्दासदादिषु दृशोनालोच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेइति सूत्रस्थमनोरमोक्तरीत्या तादृशार्थे शब्दवत्त्वं निजं तस्य प्रकृतसमर्थे रूढिः ॥ प्रकृतसू
त्रस्थस्य सिध्धशब्दव्युत्पत्तये हि प्रकृतिप्रत्ययविभागकल्पना श्रीयते अर्थस्योपादानं
त्यागश्च क्रियत इति द्वेष्यट ग्रंथस्याप्यत्रैव स्वरसः ॥ ब्रवीतिपचतेरर्थे सिध्यति निर्विनाणि
चाऽऽसण्पंतः पचतेरर्थे सर्वथैवावतिष्ठते ॥ न हृदुहेरणोणो च तुल्यार्थत्वं प्रतीयते इति
हरिग्रंथस्याप्यत्रैव स्वरसः ॥ इदमेवाभिप्रेत्य सैवण्पते नोच्यते इति कौमुद्यामुक्तं ॥ ननु
लक्ष्येते सुक्तं ॥ इयमिति ॥ पर्यंतभूमिरुदाहरणभूते समर्थः ॥ अन्याकृक्ष्येसनंतरं आ
रूढपतेहस्तीत्यपपाठः ॥ रूढेर्गत्यर्थत्वेन कर्मस्थक्रियत्वाभावात् कर्मवद्भावाप्राप्तेः ॥
किंतु आरोहतिहस्तीत्येव पाठः ॥ एवमग्रेपि ॥ मध्वपाययतेति ॥ ईदृशं मधुस्वधर्
त्वात् सोमलतयासुरभित्वात् शोभनं जातं यतः स्वयं आत्मानं मुहुरपाययत ॥ पा
▪ययितवत् ॥ न्वोत्मनेधुनोरेकत्वे न कर्थं कर्तृत्वकर्मत्वे इति चेत् शृणु ॥ परस्परस्मा
न्मेषावपसरत इत्यत्र मेषयोरेकत्वेपि परस्परशब्दमेवशब्दकृतमौपाधिकं भेदमाश्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ सापादनवृत्तयोरिव मधुशब्दात्मशब्दकृतं भेदमादाय तत्संभव इति॥ अपाययते स्तत्र
णेरणाविति तङ्॥ तस्य दयितस्य समीपे सुरताभोगः सुरतविमर्दस्तत्र विस्रंभस्तस्यो
सादनं जनकं इति जयमंगला॥ सुरताभोगविस्रंभोसादनमिति मधुविशेषणं॥ एवं
हि क्रियापूर्वस्य सुरताभोगविस्रंभोसत्तिरूपस्य परगामित्वं सुवचं तस्य दयितागत
नं त्वात्॥ अतो णिचश्चेत्स नेन सिद्धिः॥ अत्र दयिता मधु अपिबदिति प्रथमकक्ष्या॥ मधु अ
पिबदिति द्वितीया कक्ष्या॥ दयिता मधु अपाययदिति तृतीया कक्ष्या॥ मधु आत्मानं अ
पाययत इति चतुर्थी कक्ष्या॥ कर्मशब्दस्य क्रियापरत्ववादिनां कर्मान्तरासत्वस्यैतत्सूत्र
प्रवृत्तावनपेक्षितत्वात्॥ तस्य कारकपरत्ववादिभिस्तु दृश्ये विविक्ते शेषो वक्तव्य इति भ
र्तृहरिरपि कर्मशब्दस्य क्रियापरत्वमेवाभिप्रेति॥ आत्मनः कर्मत्वे प्रतिषेध इति निषेधस्तु
न॥ अणावात्मनः कर्मत्वे इति तदर्थात्॥ तत्र च वार्त्तिकमात्मभेदं परिकल्प्य भाष्ये प्रसाख्या
तं॥ योगी आत्मानं पश्यति॥ आत्मा दृश्यते स्वाद्येय यत्र नात्मभेदः॥ आत्म~~ख्ख~~दर्शनफलस्य

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याप्राप्तिः २

मोक्षस्य परयोगिगतत्वं च तस्यानभिध्याने विवरणे उक्तं ॥ अन्ये इति ॥ क्रियाफलस्य परगा
मित्वेन णिच्श्लेसैवनन्तसिद्धेरस्वारुचिः ॥ नाभिप्रेतमिति ॥ कर्मशब्दस्य क्रियाधारकोभ
यत्रापि तद्धेः कारकव्यतीहारेऽपि आत्मनेपदं स्यात् तन्माभूत् क्रियाव्यतीहारे एव यथा स्या
देतदर्थं क्रियाग्रहणं कर्तव्यमिति सेतत्तात्पर्यवत्त्वमुचितं ॥ अन्यथा वार्तिककारस्य क्रियाया
मपि कर्मपदग्राहितेरज्ञानकल्पनापत्तिः ॥ क्रियाधारको भयत्रापि कर्मपदग्राहित्सु ॥ तिकु
र्वीति सूत्रे भाष्य एव स्पष्टमुक्ता इति बोध्यं ॥ स्पष्टं चेदं संप्रदानसंज्ञासूत्रे कर्तरि कर्मेति
सूत्रे च भाष्यप्रदीपोद्योतेषु ॥ नापीति ॥ णेरात्मनेपदविध्याने ण्यन्तस्य कर्मणस्तच्चोपल
ब्धिरिति वार्तिके णेरात्मनेपदविध्यानेऽण्यन्तस्य यत्कर्म यदा ण्यन्ते तेतदेव कर्म भवति तदात्म
नेपदं भवतीति वक्तव्यं इतरथा हि सर्वत्र प्रसंगः स्यात् ॥ इहापि प्रसज्येत आरोहन्ति हस्तिनं हस्ति
पकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान् इति भाष्येण च सकर्मकाणामप्रतिषे
धस्य उक्तमायत्वात् नापीत्युक्तिः किमभिप्रायेति चिन्तनीयमेवेति बोध्यं ॥ प्रस्तुतकर्मशब्दस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पेरणो

४ क्रियापरत्ववादिनामनुकूलमेवेदं॥ भट्टिजयमंगलाभाष्ययोरपि॥ यच्चात्कर्मपदस्य क्रि
यापरत्वे स्थलाच्यतिरिक्तं कर्मत्वात्तयेसत्कर्मत्वप्रतिषेधोवक्तव्यः॥ उक्तेचनतत्रप्रयोज्य
कर्मसंग्रहायप्रतिविधेयं चेतिभावः॥ क्रियापरत्ववादिनांत्वयमाशयः॥ फलस्याधि
करणंक्रियाधिकरणमागतमेवेतिनतत्प्रतिषेधावश्यकत्वं दर्शयते॥ भसान्राजेसादोअ
णोभसेषुयाक्रियासेवणावपिइतिनप्रतिविधानावश्यकत्वमपि॥ हस्तीस्थलमा
रोहयतिमनुष्यानित्यत्रापिआरोहंतिहस्तिनं हस्तिपका इतिभाष्योदेवप्रसुदाहरण
स्यापिप्रथमवृक्ष्या॥ मनुष्याणांकर्मत्वंतुसंयोगस्पष्टिष्टत्वेनसुवचं इतिनतदर्थम
त पिप्रतिविधानावश्यकत्वमिति॥ भाष्योदाहरणप्रामाण्यादिति॥ एतद्भाष्यप्रामाण्या
त्कर्मपदस्यक्रियापरत्वमेवयुक्तंयुक्तं॥ क्रियापरत्वेपि भाष्ययोजनात्वित्थं॥ भसा
राजानंपश्यंतीतिप्रथमवृक्ष्यारूपाण्यंतावस्थायां फलरूपात्समानाधिकरणव्यापा ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपा वा क्रिया राजनिष्ठा प्रतीयते ।। फलव्यधिकरणव्यापाररूपा तु मनुष्यनिष्ठा प्रतीयते
२ राजा सेवचैत्रं भक्तान् दर्शयते इत्यत्रापि ।। राजनिष्ठफलसमानाधिकरणव्यापाररूपा ।। भक्तेष्वपि तत्
व्यधिकरणव्यापाररूपैव प्रतीयते न ततोऽधिकरणान्तरावाना ।। राजनिष्ठायां फलसमानाधि
करणव्यापाररूपायामेव प्रयोजकव्यापाररूपत्वारोपात् णिजुत्पत्तेः सुवचत्वात् ।। एवमेव
भाष्यव्याख्यानमुचितं ।। कर्मकर्तृस्थक्रियापरत्ववादिनां मते कर्मान्तरनिरपेक्षणाभावेन
तत्सूत्रप्रवृत्तेः सुलभत्वात् ।। कर्तृग्रहणानुवृत्तावपि भक्तिविपरिणामेन च क्लेशेन भाष्य
व्याख्याया अनुचितत्वात् ।। अत एव कर्तरि कर्मेति सूत्रे कर्तरीत्यस्य प्रयोजनं शेषात्कर्तरीति
पदविहितसूत्रे प्रदर्शितं न तु प्रकृतसूत्रेऽपि ।। एवं शेषेणेति ।। विधेये क्रपि विप्रतिषेधाभावेन
एकस्यैव विधेयस्य सूत्रद्वयेनापि साधुत्वबोधनसंभवस्य नव्यसंमतत्वेन नपुंसकमनपुं
सकेनेत्यस्यापि प्रसरात् ।। एकवद्भावप्रवृत्तेः सुलभत्वात् ।। विधेये क्रपि विप्रतिषेधस्य प्रवृत्ति
स्त्वीकृतं दीक्षितानां मते परं सदादिनि सर्वे र्भिन्नमित्यस्य परत्वात्प्रवृत्तो एकवद्भावाप्रवृत्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेरणौ.

५ स्यादस्यग्रहणादित्यभिबोध्यं॥ इदंच श्लेष्यप्रत्याय्यवर्णनमात्रं॥ क्रियापरत्ववादिनोऽस्येषामस्यानु
पयोगात्॥ क्रियांतरस्य चानुपस्थितेरिति॥ यद्यपि हस्तीति मध्यमणिन्यायेनोभयान्वयी
ति विवरणग्रंथेन अस्तिक्रियाध्याहारेण वाक्यभेद एव प्रतीयते॥ तथापि हस्तिनः विशेष्य
तया तन्नजं तार्थेन्वयः विशेषणतया च आरोहयतीसारव्यातार्थेप्यन्वयः इत्येवं व्याख्ये
यं॥ द्वितीयवृक्षस्याप्युदाहर्तुमुचितेति॥ धर्मपदस्य क्रियापरत्वेऽपि प्रथमवृक्षस्य प्रदर्शनेनैवो
त्कर्षसाक्रियासाम्यप्रदर्शनस्यापि जातत्वेन द्वितीयवृक्षस्योदाहरणा भावस्य नानेत्यभिसंधि
त्ति बोध्यं॥ एवं गणयति गणं गोपालकः॥ गणयति गणः स्वयमेव॥ स्मरति वनगुल्मस्य श्लोऽभि
लः स्मरयत्येनं वनगुल्मः स्वयमेव॥ पश्यंति भृत्याः राजानं दर्शयते भृत्यान् राजा॥ हं सात्मानं।
घातयत्यात्मानमिति सर्वत्र देववृक्षप्रदर्शने योजनीयं॥ किंच प्रयोज्यकर्मसंग्रहाय वृत्तग्रहणा
नुवृत्तिर्भवन्मते भाष्ये कुतो न दर्शितेति प्रश्ने उत्तरं परं भवद्भिर्विभावनीयं देयं च। मन्मता
नेनेति॥ अन्यथा प्रयोज्यकर्मसत्वे कर्मवत्वाप्रवृत्तौ तदसिद्ध्यतिः स्यादिति भावः॥ न हि तत्र

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्तयरणानुवृत्तिरूपं प्रसक्तिविधानं संभवति ॥ एवं कर्मपदस्य व्यापारपरत्ववादिभिः कर्मणा
तुल्यक्रियेवर्तयेव एतत्सूत्रप्रवृत्तिं मन्यमानेनेसपि वक्तव्यं ॥ कर्मपदस्य क्रियापरत्ववादिभि
स्तु न वक्तव्यं ॥ इति इदमपि भाष्यं क्रियापरत्वेप्रमाणं ॥ एतद्दत्तानकल्पनाभावात् ॥ एवं अये
भाष्ये यदुक्तं कर्मापदिशविध्यय: कर्मस्थभावकानां कर्मस्थक्रियकाणां वा भवंति ॥ कर्तृस्थभा
वकश्चायं इत्यपि क्रियापरत्ववादिमते यथाश्रुतमेवयुज्यते ॥ एवंजातीयकानामित्यपि वैका
रकपरत्ववादिनांमते तु कर्मणातुल्यक्रियाणां अकर्मकाणां च भवंतीत्युपलक्षणतयाव्या
ख्येयं ॥ एवंजातीयकानामित्यपिक्लेशेन ॥ एवं अनाध्याने इतिप्रतिषेधं शास्तीति भाष्ये प्रतिषेध
पदंपर्युदासेपिगम्यं प्रतिषेधमादायव्याख्येयं ॥ नतुप्रसज्यप्रतिषेधपरतया ॥ उपक्रमभाष्ये
वाक्यार्थत्रयप्रदर्शनात् ॥ तेन क्रोकिल देवदत्तोस्मरयेते इत्यत्र उभयार्थके आत्मनेपदं भवत्येवेति
बोध्यं ॥ नकृतमिति ॥ प्रेरणांतरसंबंधे सत्त्रांतरङ्गस्यांतर्भावाच्चकत्वेन त्यागकस्याप्रदर्शन
प्रविदरिणाकृतमेव ॥ इदमेवाभिप्रेत्य णिजभ्यांतत्कृतिभ्यां च उपात्तयोर्द्वयोरपि प्रेषणयो

KKSU LIBRARY
RAMTEK
441 106
M-1904
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेरणौ·

५ स्यागे इति ब्रौमुख्यामुक्तं॥ प्रेरणोत्तरे सत्र अंतरंगत्वस्य भेदवाच्यकृत्वेऽन्याप्रेषणास्वीकृतप्रेषणं
कर्मेसत्रोपात्ता। आहोस्वित्तद्भिन्ना। आद्ये पौनरुक्त्यं॥ द्वितीये फलाभावः॥ किंच स्वीकृतप्रेषणेस
त्रस्विमत्सत्यकरणात् मुख्यप्रयोजकव्यापारसत्वेऽहरेरध्यात्मनेपदं नेष्टमिति प्रतीयते। अन्य
थास्विमत्सत्यं नोपाददीत॥ अत एवाभियुक्तानां द्वितीयपक्षस्य अध्यारोपितप्रेषण इति व्यव
हारः संगच्छते॥ किंच स्वीकृतप्रेषणेसत्र ण्यंतत्वेनाभिधीयत इत्यस्य संबंधः। स्वस्य कर्तुरि
त्यत्र स्वशब्द आत्मवाचकः॥ आत्मात्र कर्म। समानाधिकरणे च षष्ठ्यौ। कर्मरूपस्य कर्तुः प्रयोजकं
कर्मेत्यर्थः॥ प्रयोज्यत्वं प्रयोजकत्वं च कर्मण एवेति फलितं॥ आत्मीयवाचकत्वात् स्वशब्दात्व्य
प४ धिकरणाच्च षष्ठी कर्मण आत्मीयो यः कर्तेत्यर्थः॥ कर्तुः कर्मसंबंधित्वं च स्वनिष्ठकर्मसंज्ञाप्रयोजक
त्वेन॥ कर्तुरीप्सिततमं कर्मेति सूत्रे॥ स्वीकृतप्रेषणं कर्मेत्यत्र प्रेषणारोपः। अभेदेन भेदेन च विवक्ष
सर ते॥ तत्र कर्मण्यपि ष्ठप्रलेमानाधिकरणेऽभेदेन। कर्मणि तु भेदेन॥ तत्र अभेदेन प्रेषणारोपे प्र
लाश्रयत्वं व्यापाराश्रयत्वं चैकस्यैव विभक्तं तयाबाधात् उदाहरणस्याकर्मकत्वं। यथौऽसोत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek.Collection

ह्यमाणो हस्तीति ॥ भेदेन प्रेरणारोपे तु अणोवृत्तेः प्रयोज्यत्वं कर्मणश्च प्रयोजकत्वं । फल
व्यापारयोर्वैयधिकरण्याद् दुराहरणस्य सकर्मकत्वं । यथा दर्शयते भक्तान् राजा ॥ स्मारयते
नेवनगुल्मः स्वयमेवेति ॥ अणौ या क्रिया सैव ण्यन्ते नोच्येते सत्राण्यंतावस्था आख्यापीति
दर्शयते भक्तान् राजेत्यत्र तामादाय क्रियासाम्यं ॥ अध्यारोपित प्रेषणपक्षे एवकारेण आप्यि
रूपमेव व्यवच्छिद्यते न तु कर्तृत्वं इत्युक्तत्वेन आरोप्यमाण इत्यत्रापि क्रियासाम्यमस्त्येव ॥ अ
त्र च पक्षद्वये प्रयोजकत्वबोधात् ग्राह्यबोधे विशेषः ॥ तृतीयं प्रकारमाह । प्रेरणान्तरसंबंधे
इति ॥ अत्र पक्षे प्रेषणान्तर्धानेन न ग्राह्यबोधे विशेषः ॥ सूत्रे लिंगवचनं चातंत्रमिति सा द
श्विव ॥ इमं प्रकारमाश्रित्यैव वक्ष्यमाणं मूले तेणिजन्तात् मरुत्तिभ्यां चोपात्तयोर्द्वयोर
पि प्रेषणयोस्त्याग इति ॥ यदा तु नोक्तरीत्या अन्यतमः प्रकारस्तदा क्रियासाम्याभावा
न्नोदाहरणत्वं ॥ तमाश्रित्योक्तं दर्शयन्ति भवो भक्तानिति ॥ द्वितीयस्य द्वितीया तु द्वितीयेन निवा
र्येतेति च ॥ इति द्वितीयपक्षमनुसादकृहरिविधार्थः ॥ ननु प्रियाश्च नरगाकृस्थ मौरखरो नूरीसा
एवंरूपे वलक्षणस्य पक्षभेदेन साधुत्वासाधुत्वयोरनैयत्यात् कथमत्र पक्षयोरर्थभेद इति चेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

धृणु॥ एवं स्यैवोपगवादेः शब्दस्य नानार्थेषु तत्तत्सूत्रैः साधुत्वबोधनवदिति॥ ननु तत्प्रयो
जकः हेतुश्चेति सूत्रस्य भाष्यरीत्या तत्समर्थाचरणमात्रस्य णिजर्थत्वात् कथमुच्यते प्रयोज
कत्वारोप इति चेत् धृणु॥ हेतुमति चेति सूत्रभाष्योक्तरीत्या प्रवर्तनाया एव मुख्यं णिजर्थत्वं॥ अ
न्यत्र तु तदारोप इति तद्भाष्यमपि तदभिप्रायकं नेयमिति॥ किंच पक्षस्यैतद्व्यवसायाद्बहूदि॥ बा
रिक्तास्वारस्येन कर्मपदस्य क्रियापरत्वं हरेरपि संमतमिति प्रतीयते॥ तथा हि निवृत्तप्रेषणं कर्म
स्वक्रियावयवे स्थितं॥ निवर्तमाने कर्मत्वे स्वे स्वे कर्तृत्वे वतिष्ठते इत्यत्र प्रेषणानिवृत्तिरूप
नस्य तथा निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते इत्यत्र प्रकृत्यर्थ एव णिजर्थ इति वर्णन
स्य न्यग्भावनान्यग्भवनं तद्धेतुकत्वे प्रतीयते॥ न्यग्भावना न्यग्भवनं ण्यंते प्रतिपद्यते इ
त्यत्र तथा तद्धेतेरणौ णौ च तुल्यार्थत्वं प्रतीयते इत्यत्र च ण्यंताण्यंतयोस्तुल्यार्थत्वोपपादन
स्य च तथा स्वीकृतप्रेषणं कर्मस्वस्य कर्तुः प्रयोजकं इत्यत्र प्रेषणारोपोद्भावनस्य च तथा प्रेरणां
तरसंबंधे इत्यत्र प्रेरणांतराप्रतिपादनस्य क्रियासाम्यप्रदर्शनमंतरेण नान्यत्स्थलमस्ति

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र कर्मपदस्य क्रियापरत्वे एव संगच्छते ॥ अण्यन्तावस्थायां कर्मणः ण्यन्तावस्थायां कर्तृत्व
स्य कर्मणः मुख्यणिजर्थप्रयोजकत्वाश्रयणेऽपि संगतेः ॥ तथाहि दर्शयते भृत्यान्राजा स्म
रयते नैव वनगुल्मः स्वयमेवेति भाष्ये उदाहरणमनुदाहरणयोः कर्मप्रयोगस्य कर्मपदस्य क्रि
यापरत्वे क्लेशाल्लेशमन्तरेणाप्युपपत्तौ यत्तदुपपत्तये क्लिष्टसंगतिस्तन्नु धैव। तथा कर्मकर्तृत्वाश्लिष्य
मिति भाष्यग्रन्थोऽपि तद्ज्ञानाभिमानमन्तरापि क्रियापरत्वे योजयितुं शक्यते ॥ तथा ऽण्यन्तस्य
कर्मणस्तत्रोपलब्धिरिति साध्यवार्त्तिकेऽप्युपलब्धिपदेऽपि ज्ञानादपि क्रियापरत्वमेव प्रतीयते ॥
ज्ञानरूपपरत्वे तु ण्यन्ते ज्ञानरूपस्योपलंभाभावात् तदसंगतिः स्यात्। कर्मपदस्य फलाश्रयलक्षक
त्वे नापि न तत्संगतिः ॥ तृतीयवाक्ये न सिद्धत्वात् वार्त्तिकानुपपत्तिः न संगता। क्रियापरत्वे तु
ण्यन्तेऽपि तत्क्रियोपलंभात् तत्संगतिः स्पष्टैव। नन्वेवं पक्षद्वयेऽपि प्रेषणान्निरुक्तप्रेषणारोप
योरविशिष्टत्वात् आद्यस्य पक्षस्य निरुक्तप्रेषण इति व्यपदेशः ॥ द्वितीयपक्षस्य अध्यारोपि
तप्रेषण इति व्यपदेशः ॥ इति नियमः कथं ॥ वैपरीत्यस्य समुच्चयस्यापि वा वक्तुं शक्यत्वात् र

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

त्तिचेत्युच्यते॥ अणोर्वर्मणो णोर्वर्तत्वेसत्यपि हस्ताग्रोद्धरणसंभवः॥ अणोर्वर्मणो णोर्वर्तत्वेऽन्यो
पायभूतं प्रकारद्वयं॥ आद्यवृक्षस्यायोप्युल्लंघितुं व्यापाररूपप्रेषणनिवृत्तिरेव॥ तत्र हि सति
पद्न्यस्ति भवद्धि नीर्वर्मणः वर्तत्वं॥ ततो निश्चितं तृतीयवृक्षस्याणं पतत्वं संपद्यते। ततो निजार्थलाभेऽपि उद्धर
रणभूतावृक्षस्या॥ तत्राद्यपक्षे सोपानस्थानीयवृक्षस्यात्रये पदन्यासः उद्धरणवृक्षस्याप्राप्यत्वे॥
तत्र च न पदन्यासः॥ अये प्राप्त्याभावात्। पदन्यासस्थाने सोपानद्वये प्रेषणानिवृत्तिसत्त्वेन
अस्य पक्षस्य निवृत्तप्रेषणइत्येवव्यपदेशः॥ द्वितीये तु पक्षे पदन्यासस्थानं सोपानद्वयं तत्र
च प्रेषणारोपोऽस्ति सारोपितप्रेषणइत्येव व्यपदेशः इति॥ अथ चारोपो नाम आहार्यज्ञानं तत्फलो
वेदशास्त्रेच न प्रवर्तितुं नापि निवर्तितुं॥ तत्र लोके यथा रज्जौ आहार्यरजतज्ञानेन प्रवर्तितुं॥ रज्जा
वाहार्यसर्पज्ञानेन न निवर्तितुं॥ शास्त्रेऽपि आहार्य अभूपरत्वज्ञानेन यागादिशास्त्रप्रवर्तितुं॥ ए
वमाहार्यमभूपरत्वाभावज्ञानेन यागादिशास्त्रनिवर्तितुं॥ किंचित्तु शास्त्रप्रामाण्यात् आहार्य
मपि ज्ञाने प्रवर्तितुं निवर्तितुं च॥ यथा बर्हिषि बीहिसत्र आहुनेयमहनइति शास्त्रे प्रवर्तते॥

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणपती सञोपध्यासंज्ञा न प्रवर्तते ॥ एवं अर्थवत्परिभाषायां अर्थवत्त्वम् अनाहार्येणार्थे
न। यथा शाब्दिकमते वाक्यस्य। क्वचित्तु शास्त्रकृत्कल्पितेनाहार्येणाप्यर्थेन। यथा द्वेस्तीयस्य
पटुजातीयाये त्यत्र तु जातीयर्प्रत्ययस्य तीयस्य आहार्यार्थवत्त्वेऽपि तस्य शास्त्रकृत्कल्पि
तत्वाभावात् न ग्रहणं ॥ एवं णोरणाविस्तत्र णेः कर्मणि मुख्यप्रेषणसत्त्वे अनाहार्यार्थवत्त्वे णे
शास्त्रस्य चारितार्थ्यात् आहार्यार्थवत्त्वे णेः शास्त्रस्याप्रवृत्तिरेव स्यात्। सा चेयं प्रव्याप्तिः कर्म
पदस्य द्वारकपरत्ववादिनां मते ॥ कर्मपदस्य क्रियापरत्ववादिनां मते तु आहार्यमन्तरेण क्रियासा
म्याभावात् एतत्सूत्राप्रामाण्यात् आहार्यप्रवृत्ति ज्ञानं एतत्सूत्रप्रवृत्तौ नियामकं इति न दोषः ॥ व
तु मन्त्रावृत्तित्वादिति ॥ अत्रोच्यते लक्षणा वृत्तिज्ञाने कारणद्वयं। शक्यसंबंधित्वज्ञानं तात्पर्यानु
पपत्तिज्ञानं च। आद्यं तु तीरं गंगासंबंधीति। तत्र गंगासंबंधित्वस्योपलक्षणतया भाने ती
रत्वप्रकारकः गंगासंबंधितीरविशेष्यकः शाब्दबोधः। यथा यः पीतवासाः स चैत्र इति शाब्दि
ग्रहे पीतवासस्त्वस्योपलक्षणत्वात् चैत्रत्वप्रकारकः शाब्दबोधः। इयमेव जहत्स्वार्था लक्षणे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोरणो·

२

लुप्यते ॥ शब्दार्थस्य कथमपि शाब्दबोधे भानाभावात् ॥ यदा तु लक्षणा तज्ज्ञाने शक्यसंबंधित्व
ज्ञानं विशेषणतया भासते ॥ तदा शक्यसंबंधप्रकारकः तीरविशेष्यकः शाब्दबोधः ॥ इयमेवा
जहत्स्वार्थालक्षणोच्यते ॥ एवं स्थिते यत्पुंयोगादाख्यायामिति सूत्रे भाष्ये उदाहृतं पुनरत्रोदाहर
णं प्रष्ठी प्रचरीति ॥ कथं पुनरयं प्रष्ठशब्दोऽग्रगामिन्यां वर्तते ॥ तस्येदमिति सनेनाभिसंबंधेन ॥
यथा ह्यसौ तत्कृतान् स्थानोद्वर्तनपरिषेकादीन् लभते एवं प्रष्ठशब्दमपि लभते ॥ यद्येवं पुंयोग
दाख्यायां तद्धितलुग्वचनं ॥ पुंयोगादाख्यायां तद्धितस्य लुग्वक्तव्यः ॥ तस्येदमिति प्राप्नोति ॥ न
तर्हीदानीमिदं भवति ॥ प्राष्ठपदं मां प्राचर्य इत्यादि इति ॥ भवति च ॥ विभाषा लुग्वक्तव्यः यदा लुक् त
दा प्रष्ठी ॥ यदाऽलुक् तदा प्राष्ठी ॥ यद्येवं नार्थो लुग्वा विभाषा तद्धितोत्पत्तिः यदा तद्धितोत्पत्तिः त
दा प्राष्ठी ॥ यदा न तदा प्रष्ठी ॥ एवमपि लुग्वक्तव्यः ॥ नह्यंतरेण तद्धितस्य लुकं परार्थे शब्दो वर्तते ॥ य
दि पुनस्तस्यामेव प्रष्ठशब्दो वर्तते ॥ कथं पुनस्तस्यामेव प्रष्ठशब्दो वर्तते × अप्रतिष्ठमानायां ×
यथैव ह्यसौ अकुर्वती किंचित्सापं भर्तृकृतान् वधबंधपरिक्लेशान् लभते ॥ एवं प्रष्ठशब्दमपि ल
भर्तृकृतानिति ॥ भर्तुः वधादिकर्तृत्वं संविधानमात्रेण ॥ संविधानं च वधादिकारणपाप
कर्तृत्वेन । एतदेवाभिप्रेत्य पुंयोगादिति सूत्रे शेखरे भर्तृपापकृतानित्युक्तं ॥ मुख्यं
वधादिकर्तृत्वं तु प्रयोजककत्वेन राज्ञ इति बोध्यं ॥ तदपि युगांतरविषयकं ॥ पापमकुर्वतां कि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भते॥ सुबंतसमासवचनाच्चाकारांतानुपपत्तिः॥ सुबंतस्य समासवचनाच्चाकारांतता नोपप
पद्यते॥ सुबंतानां समासः॥ तत्रांतरंगत्वात्टाप्॥ छाप्पुसन्ने समासः॥ स्याशब्दः समस्येत॥ तत्र
पुंयोगादाख्यायां अकारांतादिति वारेण न साम्येऽस्ति॥ स स्त्रंतु स्त्रियाः पुंशब्देनाभिधानात् सिद्धमेत
त्कथं॥ स्त्रीपुंशब्देनाकारांतेनाभिधीयते॥ ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति
नैष दोषः॥ आचार्यप्रवृत्तिर्ज्ञापयति॥ नान्तस्तद्धितोत्पत्तिर्भवतीति॥ यदयं पुंयोगादाख्यायामिति
ईकारं शास्ति॥ नैतदस्ति ज्ञापकं॥ अस्ति ह्यन्यदेतस्य वचने प्रयोजनं॥ किं॥ ये नीकारास्तद्धितास्तद
र्थमेतत्स्यात्॥ यत्तर्ह्याख्याग्रहणं करोति॥ नहि तद्धितांतमाख्या भवति॥ अथवा पुनरस्तु तस्येद
मित्यनेनाभिसंबंधेन॥ ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति॥ नैष दोषः॥ नावश्यम
यमेवाभिसंबंधो भवति तस्येदमिति॥ अयमप्यभिसंबंधो भवति॥ सोऽयमिति॥ कथं पुनरत
स्मिन् स इत्येतद्भवति॥ चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति॥ तात्स्थ्यात्॥ ताद्धर्म्यात्॥ तत्सामी
प्यात्॥ तत्साहचर्यादिति॥ तात्स्थ्यात्तावत् मंचाः हसंतीति गिरिर्दह्यते॥ ताद्धर्म्यात् जटिनं यांतं ब्रह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोरणो.

१० दत्त इत्यादि ॥ अस्मदृते यानि न्यायवार्यणिजग्रन्थेष्वपि क्विं प्रवर्तेते इति । अतो जटी ब्रह्मदत्त इत्युच्यते ॥ तत्सामी
प्यात् गंगायां घोषः । कूपे गर्गकुलं । तत्सादृश्यात् कुंतान् प्रवेशय यष्टीः प्रवेशयेति ॥ कथं पुन
रिति । वक्ष्यमाणोऽभिप्रायः ॥ शक्तिर्नास्तीति वा ॥ तस्येदमिसनेनाभिसंबंध्येनेति ॥ स्त्रियां शक्यप
४७ संबंधसत्वेन लक्ष्यार्थस्यावर्तते इत्यत्राय आचार्यस्य । शक्यसंबंधेन तद्बुद्ध्यालाभे दृष्टांतमाह
। यथा स्यसेनेन तत्वतामिति ॥ एतेन पश्चादिषु दृष्टांतासंभव इति दीपस्य लक्षण एवात्र पुंयोगो
गः स्यत इति च अपास्तं ॥ दृष्टांतस्य पुंयोगपदार्थसंबंधो न चक्रते मानाभावात् । वक्ष्यमाणगंगायां
घोष इत्यादावेव लक्षणाविषयोदाहरणपरभाष्यविरोधाच्च ॥ अग्रिमं तु भाष्यं उक्तमाशयम
जानानस्य शक्तिमेव वदंतिं मन्यमानस्य आचार्यदेशीयस्योक्तिप्रसक्तिमात्रपरं । नावश्यमयमे
वाभिसंबंधो भवतीति तस्येदमिति । अयमप्यभिसंबंधो भवतीति सोयमितीति ॥ अयमेवाभिसंबं
धो न भवतीति भाष्ये एवप्रकारेण भेदसंबंधस्यापि लक्षणामूलत्वमस्तीति बोधितं । अयमप्यभि
संबंधो भवति सोयमिति भाष्येऽपि शक्त्युपादानेनापि ॥ अभिसंबंधपदोपादानेनाभेदस्यापि सं

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधत्वमितिचेत्॥ चतुर्भिः प्रकारैरिति॥ नेदं परिगणनं किंतूदाहरणमात्रं। साहचर्यसंबंधमात्रो
पलक्षणमिति विवरणग्रंथात्। जन्यजनकभावसंबंधे लक्षणा नास्तीत्यत्र मानाभावात्॥ एवं
च पुंयोगादाख्यायामिति सूत्रस्थं भाष्यं लक्षणायां नासाधुत्वबोधकमिति सिद्धं॥ परश्चेति सू
त्रस्थं भाष्यमपि न लक्षणायामसाधुत्वबोधकं॥ तत्र हि भाष्ये परश्चेत्यत्र नियमद्वयं प्रदर्शितं
प्रत्ययपर एव प्रकृतिः प्रयोक्तव्या इत्येको नियमः॥ प्रकृतेरेव परः प्रत्ययः प्रयोक्तव्य इत्यपरो नियमः
बाभ्रव्यो मांडव्यो लामकायन इत्यर्थे बभ्रुर्मंडुर्लमक इति न प्रयुज्यते इति आद्यनियमस्य फलमु
क्तं॥ कृमस्य द्वयसमिति कृमस्य प्रमाणमित्यर्थे न प्रयुज्यते इति द्वितीयस्य नियमस्य फलमुक्तं॥
तत्र प्रत्ययविधुद्देश्यतावच्छेदकाक्रांतं न प्रयुज्यते इति उक्ततदनाक्रांतमपि न प्रयुज्यते इति विवक्षि
तं॥ आद्ये रज्जुयदुष्टद्वयोर्लक्षणया तदपत्यपरयोः स्वार्थांतर्भूतापत्यापत्यवत्संबंधयोरन्वयत्वे
न षष्ठीप्राप्तिरहितयोः निर्देश्यतया प्रथमोपस्थितबोध्यबोधकत्वरूपप्रथमत्वाभावेन च तदवच्छे
दकाक्रांतत्वेन उक्तनियमाप्रवर्तकत्वेन प्रयोगस्यात्॥ द्वितीये प्रत्ययार्थाविवक्षायामपि प्राप्तिप
रिष्ठाया अपि न प्रयुज्येरन्॥ एवं च परश्चेति सूत्रस्थं भाष्यमपि न लक्षणायामसाधुत्वबोधकमिति सिद्धं

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ ननुअपदंनप्रयुंजीतेतिअपरस्मिन्सिद्धेनंनप्रयुंजीतेतिनिषेधद्वयंपृथक्अस्तिनवा।तत्राद्यंद्व्येक
योर्द्विवचनैकवचने इत्यत्र एकवचनमिति योगविभागमूलकं असत्येवेति नास्तीति वक्तुमशक्यं।
द्वितीयं तु ब्राह्मणेन न म्लेच्छितवै इति यस्य शास्त्रस्य भाष्यमूलकं तृतीयचतुर्थपंचमाध्यायभिन्ना
ध्यायविहितविधेयमन्यासाधुत्वबोधनफलकं असत्येवेति नास्तीति वक्तुमशक्यं। एवं च तेनैव सि
द्धे परश्चेति सूत्रं व्यर्थमेव। व्याप्यस्य व्यापकफलत्वासंभवात् परश्चेति सूत्रद्रोखरेतं एतन्मूलक
मेव पठ्यते अपदं न प्रयुंजीतेति चद्वृथं संगच्छतां इति चेत् अणु। याहृसूत्रस्थ प्रत्ययपदस्यैवर
त्यपि प्रत्ययपदं विधीयमानमात्रबोधकं अतो नोतुत्रं बावब्राङ्गा इति। यद्वा स्थालीपुलाकन्यायेन
ग्राहक सूत्रस्थ प्रत्ययपदस्य भाव्यमानेन परिभाषा तापत्वात्वबतगतिश्वारकोपपादनामिति परिभा
षायां एवं देशानुमतसाधारणं तत्र बन्नोतुत्रं ब्रावब्राङ्गा इति। यद्वा पूर्वविप्रतिषेधसंग्रहाय विप्रती
षेध सूत्रस्य परत्वाद्वत्प्रदिष्टापि परत्वाद्वत्स्येष्टवाच्यत्वात् इष्टं भवत्येव इष्टमेव भवतीति नियम
द्वयं अतो नोतुत्रं ब्रावब्राशा इति ॥३॥ तूपक्षत्रयेच परश्चेत्यस्य परिभाषात्वमेष्टव्यं। नाधिकारत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्यमपक्षेचअपदंनप्रयुंजीतेत्यस्यपृथक्कृत्वेतस्यापिपरिभाषात्वमेष्टव्यमतोस्तृतीया
ध्यायात्सर्वत्रपंचमाध्यायादुत्तरत्रप्रार्थवत्त्वातिपाद्यांचप्रवृत्तिःसिध्यतीतिबोध्यं॥किंच
प्रेरणावास्तवीआरोपितावाणिजर्थइतिब्रुवतांमतेत्वाद्रूमात्रस्योभयविधप्रवृत्तिनिमित्तत्व
मभिमतंलक्ष्यते॥तथास्वर्गतिआहार्यार्थेनार्थवत्सुत्राद्वैपुर्विशेषरूपोपादानमर्हितानांअनाहा
र्यार्थवृत्तिचरितार्थानांअर्थवत्सूत्रार्थवत्परिभाषादीनांजातीयत्वेंतर्गततीयत्राद्वेइवप्रसना
पत्तिप्रौढ्येणतथाअपदकार्याणांतासांप्रतिपाद्याहेत्रानामान्तरलब्धसादिसूत्राणांचानाहार्यार्थवृत्ति
चरितार्थानांप्रवसनापत्तिप्रौढ्येणचविशिष्टरूपोपादानेएवायंन्यायःपदकार्येष्वेवायंन्याय
इतिगौणमुख्यन्यायसंकोचेचस्वैवैफल्यमेवस्यात्इतिबोध्यं॥तस्यादृष्टुंतुपंचमप्रक्षात्वस्व
रसत्तउपपद्यतइति॥अवस्थांपंचमींप्राप्तुंर्णेतेतामितिहरिणाप्राहुरिसुकृपाहरे स्तस्याःपंचमी
त्वेयथावृथंस्विदुपपाद्यमिति अन्वाख्यानोपायमात्रमितिचरीरवशेकृपाशेखरव्याख्यानस्यचउत्त
तरणत्रष्णायाःपंचमीत्वेनिर्भरोनास्तीतिगम्यते॥पंचमीत्योपपत्तिस्तुमन्यसेयदितद्रूपंमया
द्रष्टुमितिप्रभो।योगेश्वरततोमेत्वंदर्शयात्मानमव्ययमितिभगवद्गीतोक्तरीत्याअयंहस्तीआ

१४

लाक्षणिकेषुरा
देषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ रोहंतावृपइतिप्रथमवृक्ष्या। यद्वा पूर्वंप्रयोजकव्यापारः ततःप्रयोज्यव्यापारः ततःकर्मव्यापार
इतिक्रमसत्वेन त्वं मां आरोहेति प्रथमवृक्ष्या। एवं शीसा पंचमीत्वोपपत्तिर्बुद्धेति प्रतिभाति॥
एवं पूर्वविप्रतिषेधोपि चिंत्य इति। तत्रेयं चिंता। उपपदानपेक्षत्वेनांतरंगत्वात् विप्रतिषेधेप
वेंतरंगत्वात् इति तदर्थः॥ सर्वनामसंज्ञाप्रवर्तणे विभक्तिनिरपेक्षत्वेनांतरंगत्वान्निसेवसंज्ञा
भवतीति ग्रंथकारोक्तेः॥ प्रतिपदोक्तत्वमप्युभयोरविशिष्टं। उभयत्र विभाषात्वेन निषेधानांब
लीयस्त्वमपि न। न वेति विभाषेति सूत्रे त्रिसंज्ञायां विभाषोपक्रमे विभाषोपपदेनेति विभाषा
नुवृत्त्या प्राप्तेइति सिद्धांतितं। एवं च प्राप्तविभाषात्वमेवास्यान तूभयत्र विभाषात्वं। णिचश्चेत्यनु
वृत्तावुभयत्रविभाषात्वासंभवश्च। स्वरितेनाधिकार [illegible] इति निवर्तते इत्यस्य भाष्यस्य णिचश्चेत्य
नुवर्तते इत्यर्थः॥ किंचानंतरस्य विधिर्वा भवति प्रतिषेधो वेति सुबंतेर्णरणा विसस्य निषेधासंभवो
पिबोध्यः। किंच प्राप्तविभाषाणां निषेधमुखेन प्रवृत्तावपि निषेधानां यथा बलीयस्त्वं तथा पर
निसांतरंगापवादानामुत्तरोत्तरं बलीयस्त्वमुपाअंतरंगस्यापि बलीयस्त्वं। द्वयोर्बलीयसोर्विप्र
तिषेधसूत्रेण व्यवस्था विप्रतिषेधसूत्रापेक्षया च अंतरंगबलीयस्त्वेन व्यवस्था इष्यते। किंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वयोः परिभाषयोर्विरोधे उभयनिर्देशे पंचमीनिर्देशो बलीयानिति न्यायेन निषेधाभावेति परिभाषा
वृमेर्णिद्धः इति सूत्रस्था। पुंवत्कर्मधारये इति तद्बाधकसूत्रस्था वा। अंतरंगपरिभाषा तु वाह ऊठ् सूत्रस्था
इत्यंतरंगपरिभाषयैव परत्वेन व्यवस्थोचिता। ननु णेरणाविति स्य प्रथममंतरंगत्वं। अणौ यो क्रिया
सैव ण्यंते नोच्येत। अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यात् इति वाक्यार्थान्तरसापेक्षत्वेन णेरणाविति स्य।
पि बहिरंगत्वात् इति चेन्न। अण्यंतावस्थायां कर्मकारकत्वस्य तत्र क्रियासामान्यस्य चार्थरूपत्वेन श
[ऽस्तु येभ्यः] ब्दानपेक्षणात्। अर्थकृतबहिरंगत्वं तु नव्येभ्यो न येभ्यो न रोचते जातु चित्। अर्थकृतं तदंगीकुर्वतां म
ते तु प्रतिपदविधित्वमस्यास्त्येव। णिच्सानापेक्ष[illegible]याणित्वतान्तस्य प्राथमिकत्वात् इति॥ किंच स्व
रितञित इति सूत्रे भाष्ये स्वरितञित इत्यत्र ग्रहणं मर्श्रिमा चतुःसूत्री च प्रत्याख्याता। एवं चास्यैव प्रतिपदवि
धित्वे सुवचं॥ प्रत्याख्यानोपायस्तु येषां धातूनां कर्त्रभिप्रायमकर्त्रभिप्रायं च क्रियाफलं तत्रैवात्म
नेपदं। उभयविधं च क्रियाफलं नाह्वादिस्वाभाव्यात् पंचसूत्रीविषयधातूनामेव नान्येषामिति॥
यद्यपि भाष्ये स्वरितञित इत्यत्र ग्रहणस्यैव प्रत्याख्याने दूषणं तेन भाषितं तत् पंचसूत्रीविषयं व्याख्येयं॥
प्रत्याख्यानोपायस्य सर्वत्र तुल्यत्वात्॥ अत एव विभाषोपपदे इति सूत्रे रोरवरे पंचसूत्र्यनुवर्तते कर्त्र
भिप्रायक्रियाफलविवक्षायामात्मनेपदमिति तदर्थं दृसुत्वं। तत्रारंभपक्षेऽनुवर्तत इति। प्रत्याख्यानपक्षे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोरणौ -

१३ वृत्त्यभिप्राये इति व्याख्येयं ॥ अथ निषेधानां बलीयस्त्वं सर्वविधिभ्यो लुग्विधेरिवोच्यते ॥ तद्विन
अनंतरस्यैव विधेर्वा भवन्ति प्रतिषेधो वेत्यत्र प्रतिषेधापवादवैयर्थ्यापत्तेः ॥ तस्माद्बुद्धीनामिव निषे
धानामप्यनवकाशत्वमुत्सर्गमेव बलीयस्त्वं ॥ अत एव वृद्धिर्मेर्णिङ् सूत्रे प्रतिषेधबलीयस्त्वादिति भा
ष्यप्रतीके प्रतिषेधस्यापवादत्वाद्बलीयस्त्वं इति कैयटोपाध्यायैरुक्तं ॥ अथ स्वापवादभिन्नेभ्यः
परनित्यांतरंगप्रतिपदविधिभ्यो निषेधबलीयस्त्वमुच्यते । यथा न गोऽश्वादिबहुव्रीहौ नासिकोदरोष्ठेति ।
लुक्तोऽपि ह्रस्वीभावादतः स्वमोरमादेशात्स्वापवादान्न बलीयस्त्वं ॥ एवं च न प्रतिषेधापवादवैयर्थ्यमिति तद्
ष्विन ॥ तथा च कल्पने प्रमाणाभावात् ॥ उगवादिभ्यो यदिति सूत्रे भाष्ये विभाषाविरूपादिभ्य इति वि
भाषापेक्षयाच्च रव्याप्तं तु ह्रस्वादित्यत्र पूर्वविप्रतिषेधेन नित्यमेव यदिति सुलुक् न ह्रस्वो भाष्याच्च ॥ अथ तसिला
दिषु जातीयदेशीयरोः पाठादेव तसिलादिषु पुंवत्कर्मेति सूत्रे जातीयदेशीयग्रहणस्य तु विधेयनिषेधबली
यस्त्वज्ञापकत्वमुच्यते । तद्विन ॥ भाष्याव्यभिचारितमपि योजनानां सूत्राक्षराणां पारायणादावदृष्टार्थत्व
मेव न तु फलांतरे मिनिवेशः स्यादीति नव्यसिद्धांतात् ॥ एवं हि सति प्रतिपदोक्तत्वात् तेष्वादिष्वपि पुंव
द्भावसिद्ध्या पुंवत्कर्मधारयेति सूत्रे जातीयदेशीयग्रहणं दृष्टार्थमेव व्यर्थं ॥ वृद्धिर्मेर्णिङ् इति सूत्रस्थभाष्यम
पि नात्रार्थे विरुध्यति ॥ प्रस्तुतस्तु मेवार्थमनुरुध्यति ॥ अथ तयादेशाडभयप्रतिषेध इति वार्तिकं अय

॥

26

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चः प्रसयांतरत्वेन तत्र साख्या न भाष्यं च निषेधा नो बलीयस्त्वे प्रमाणमुच्यते ॥ तदपि न ॥ उभयप्रतिषे
धो वक्तव्य इत्यस्य यणः प्रतिषेधो वाच्य इत्यत्रैव वक्तव्य इत्यस्य आख्येय इत्यर्थः ॥ आख्या चात्राभ्यंतर
॥ वात् प्रतिपदोक्तत्वात् अयं चः प्रसयांतरत्वाच्च ॥ उपायस्योपायांतरादूषकत्वात् ॥ अथ उभयत्रवि
भाषास्विवरादिवाक्यार्थद्वयं सर्वनामसंज्ञा न भवतीति इस्येत्रोवाक्यार्थः ॥ ततो वा भवतीत्यपरः ॥
एवं च निषेधस्यानवकाशत्वात् विकल्पे प्राप्ते अयं चः प्रसयांतरत्वमावत्र्यपवादं इत्युच्यते ॥ किंच न
स्मेहितमितिप्रकरणे उगवादिभ्यो यदिति सूत्रे भाष्ये औपानह्यं चर्मण्याद्यषेयं च मर्दस्तत्र अठओ
स्तिष्वये पूर्वविप्रतिषेध उक्तः ॥ प्रतिपदोक्तत्वादेव सिद्धे पूर्वविप्रतिषेधस्य किंफलं ॥ एवं च रमास्तं
दुला इत्यस्य सिद्धये विभाषात् विरपाद्भ्य इत्यपेक्षया पूर्वविप्रतिषेध उक्तः ॥ एवं हि सति सूत्रे
अर्थविशेषलक्षणादणपवादात् ण्यादयः पूर्वविप्रतिषेधेनेति पूर्वविप्रतिषेध उक्तः ॥ तत्र प्रतिपदो
क्तेन सह विप्रतिषेधकथनं कथं संगच्छतां इति चेदुच्यते ॥ उगवादीति सूत्रे प्रतिपदोक्तेन सह विप्रति
षेधकथनं भाष्योक्तं चिंत्यमेव इति तत्रैव कैयटोऽप्यासावकाशत्वेपि प्रतिपदोक्तस्य बलीयस्त्वं ॥ स्वांपी
लत्र दीर्घो भवत्येवेति कैयटमतं प्रतीयते ॥ तत्रैव सूत्रे अनवकाशत्वे एव प्रतिपदोक्तं बलीयः इति
मुनिसंमतं लक्ष्यते स्वपी सत्र दीर्घो न भवत्येवेति मनोरमाकारमतं प्रतीयते ॥ प्रतिपदोक्तत्वं साव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोरणौ

५२ दीर्घो भवत्सेवेति स्वांपीसत्र सङ्गो स्वरो तुपास्वांपीति दीर्घप

२४ कान्त्वेपि बलीयस्त्वमयोजकं। स्वांपीसत्र दी
दितमेवसाधु इति नव्यसंमतं लक्ष्यते॥ तत्र प्रतिपदोक्तेन पूर्वविप्रतिषेधेन च एवमेव लक्ष्यं सिध्यति
विप्रतिषेधे पूर्वं प्रतिपदोक्तत्वात् इसेवं पूर्वविप्रतिषेधवचनं व्याख्येयं। यत्र तु प्रतिपदोक्तत्वेनाप्या
दृष्टं लक्ष्यं सिध्यति पूर्वविप्रतिषेधेन चान्याद् दृष्टं सिध्यति। यथा चरव्यास्तुडुला॥ तत्र वाचनिकः पूर्व
विप्रतिषेधः॥ परत्वाद्धस्येष्टवच्चित्वं वा। तत्सामर्थ्यात् नोभुयभावि भाषात्वे। यत्र तु न वचनारंभः
यथोभयेदेव मनुष्याः तत्र प्रसयांतरत्वादिदमुपायां तरमास्थेयं॥ एवं रीसा भाष्यप्रदर्शितमार्गद्वये
नसंचरन् लक्ष्यस्य साधुता साधुत्वे निश्चिनुयादिति। इतोप्यधिकं ~~[illegible]~~ मकृतांतरं वा सर्वेना
मसंज्ञाप्रकरणस्थदोस्वरविवृतिसंग्रहोक्तरीसा परिभाषेंदुशेखरविवृतिसंग्रतो तद्रीसावावसेयं॥
नैवमानं पश्यामइति॥ अनंतरस्य विधिर्वा भवति प्रतिषेधो वेसस्य व्यवहितस्य निषेधो न भवति
इसेतत्तासर्वत्र निषेध्यस्येव मानत्वात्। एवं येन नाप्राप्तिन्यायस्य अनाप्राप्तस्य निषेधो न इसेतत्ता
सर्वत्र स्यापि मानत्वात्॥ एवं अणावकर्मवृद्धिसस्य विषये पूर्वविप्रतिषेधवचनमाचार्यदेशीया
नुरोधेन कृतं इति बोध्यं॥ इतिमत्वाकृतं किंचित्स्वातंत्र्यं क्षम्यंतां बुधैः॥ इति प्राचीनयाज्ञाया सार्वत्रिकविवृतिसंग्रहे द्विरणाङ्कितसूत्रविवृतिसंग्रहः समाप्तः॥
सानन्दैः सपूलीकृता॥ इति शब्देन्दुशेखरविवृतिसंग्रहेण रणाङ्कितसूत्रविवृतिसंग्रहः समाप्तः॥

२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु प्रतिपदं विधिर्वा मस्यास्तेवे निरुच्य ज्ञानापेक्षयाणिलक्षानस्य प्राथमिकत्वाद् इति ॥ किंच
स्वरितञितः इति सूत्रे भाष्ये स्वरितञितः ग्रहणं अग्निमाचतुः सूत्री च प्रत्याख्याता एवं चास्यैव प्र
तिपदोक्तत्वं सुवचं ॥ प्रत्याख्यानोपायस्तु येषां धातूनां कर्त्रभिप्रायमकर्त्रभिप्रायं च क्रियाफलं
तत्रैवात्मनेपदं उभयविधं च क्रियाफलं शब्दशक्तिस्वाभाव्यात् पंचसूत्रीविषयाणामेव धातूनां
नान्येषामिति ॥ यद्यपि भाष्ये स्वरितञितः ग्रहणस्यैव प्रत्याख्यानं दृश्यते तथापि तत्पंचसूत्रीवि
षये व्याख्येयं ॥ प्रत्याख्यानोपायस्य सर्वत्र तुल्यत्वात् ॥ अत एव विभाषोपपदेनेति सूत्रे शेखरे पं
चसूत्री अनुवर्तते कर्त्रभिप्राये क्रियाफलविषये आत्मनेपदमिति तदर्थ इत्युक्तं तत्र आरंभपक्षे
अनुवर्तत इति ॥ प्रत्याख्यानपक्षे कर्त्रभिप्राये इति व्याख्येयं ॥ अथ निषेधानां बलीयस्त्वं सर्ववि
धिभ्यो ऽनुविधेरेव उच्यते ॥ तद्विना अनंतरस्य विधिर्विभवन्ति प्रतिषेधो वेत्यत्र प्रतिषेधपद
वैयर्थ्यापत्तेः ॥ तस्मात् विध्यनापि वनिषेधानामपि अनवकाशत्वमूलकमेव बलीयस्त्वं ॥ अत ए
व न मण्डि इति सूत्रे भाष्ये प्रतिषेधबलीयस्त्वादिति भाष्यमतीव प्रतिषेधस्य विध्यपवादत्वाबाध
बलाबलीयस्त्वं इति कैयटोपाध्यायैरुक्तं ॥ अथ स्वापवादभिन्नेभ्यः परनित्यान्तरंगप्रतिपदविधिभ्यः निषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धानांबलीयस्त्वमुच्यते। यथा नत्रोऽऽदिबहुचः॥ नास्ति त्रोद्रौ सेष्टेति। लुक्ते पित्रि इक्कीबादतः स्वमोरमादे
१५ शात् नी स्यापवादात् नबलीयस्त्वं। एवं च न प्रतिषेधपदवैयर्थ्यं तदपि न॥ तथा च रूपनेप्र
माणाभावात्॥ उगवादिभ्यो यदिति सूत्रे भाष्ये विभाषा हविरपूपादिभ्यः इति विभाषापेक्षया
चरव्यास्तु उलाइसत्रत्र वे विप्रतिषेधेन नित्यमेव यत् इत्युक्तं लघुरो धायें॥ अथ तसिलादिषु जा
तीयर् देशीयरोः पाठादेव सिद्धे पुंवत्कर्मधारये ति सूत्रे जातीयर्देशीयर्ग्रहणस्य उक्तं विधि प्रतिषे
धबलीयस्त्वज्ञापकत्वमुच्यते तदपि न। भाष्ये विचारितप्रयोजनानां सूत्राक्षराणां पारायणादा
वदृष्टार्थत्वमेव न तु प्रकांतरेऽभिनिवेशः कार्य इति न व्यसिद्धांतात्॥ एवं सति प्रतिपदोक्तत्वात्वोप
धादिष्वपि पुंवद्भावसिद्ध्या पुंवत्कर्मधारये ति सूत्रे जातीयर्देशीयर्ग्रहणं दृष्टार्थं नैव कार्यं। क्रमेणोदाह
स्तु तस्य भाष्यस्यापि नान्योन्येन विरुध्यते॥ प्रस्तुत उक्तमेवार्थमनुरुध्यते॥ अथ तमादेरोगुभयत्र प्रतिषे
धः इति वार्तिकं अयचूः प्रसयांतरत्वेन तत्रस्य व्याख्यानं भाष्ये च निषेधानां बलीयस्त्वप्रमाणमुच्य
ते। तदपि न उभयप्रतिषेधो यलुव्यद् सस्य य [illegible] णः प्रतिषेधो वाच्य इत्सनेन वक्तव्य इत्सव्याख्येय इ स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थः॥ व्याख्यातं चेष्टा अंतरंगत्वात् प्रतिपदोक्तत्वात् अयचः प्रत्ययांतरत्वाच्च। उपायस्थापायांतराद्
पदत्वात्। अथउभयत्र विभाषा स्यचिवदूषि वा द्वृपार्थ द्वयं सर्वनामसंज्ञा इन भवेदसेड्का द्वपार्थेः
न तेवा भवतीत्सपरः एवं च निषेधस्यानवकाशत्वात् विकल्पप्राप्तेअयचः प्रत्ययांतरत्वमाव
श्यकं इत्युच्यते॥ किंच तस्मैस्मिन्निति प्रकरणे उगवादिभ्योयदिति सूत्रे भाष्ये ओपानत्यं चर्मण्याद्येयं
चर्मइत्यत्र भ्रष्टोस्ति सप्तमेपूर्वविप्रतिषेधउक्तः प्रतिपदोक्तत्वादेव सिद्धे पूर्वविप्रतिषेधस्य किं फ
लं एवंच रव्यास्तु लाइसस्पष्टिषुयेविभाषाहविरपूपादिभ्य इत्यपेक्षया पूर्वविप्रतिषेधउक्तः॥ एवंचे
त्वदितांदित्सेति सूत्रे अर्थविशेषलक्षणाद्गणपवाद्दात्तण्यादयः पूर्वविप्रतिषेधेनेति पूर्वविप्रतिषेध
उक्तः तत्र प्रतिपदोक्तेन सह विप्रतिषेध कथनं कथं संगच्छतां इति चेदत्रोच्यते उगवादीति सूत्रे प्र
तिपदोक्तेन सह विप्रतिषेध कथनं भाष्योक्तं चिंत्यमेव इति तत्रैव कैयटोक्तपासावकाशत्वेपि प्रतिप
दोक्तस्यबलीयस्त्वं स्वोपी सत्रदीयैभवत्सेवेति कैयटमतं प्रतीयते॥ तत्रैव सूत्रे अनवकाशत्वे एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेरणे।

प्रतिपदोक्तं बलीयः इति मुनित्रयसंमतं त्वचि पीत्सत्र दीर्घो न भवतीत्येवेति मनोरमाकारमतं प्रतीयते ऽप्र
१६ तिपदोक्तत्वं सावकाशत्वेऽपि बलीयस्त्वप्रयोजकं त्वचि पीत्सत्र दीर्घो भवत्येवेति त्वचि पीत्सत्र सौरवरो रूपास्त्वां
शा॥३ पीत्यादिदीर्घप्रवृत्तमेव साधु न ब्रूसंमतं लक्ष्यते॥ अत्र प्रतिपदोक्तत्वेन पूर्वविप्रतिषेधेन च एवमेव लक्ष्यं सि
ध्यति विप्रतिषेधे पूर्वं प्रतिपदोक्तत्वात् इत्येवं पूर्वविप्रतिषेधवचनं व्याख्येयं। यत्र तु प्रतिपदोक्तत्वेनान्या
दृशं लक्ष्यं सिध्यति पूर्वविप्रतिषेधवचनेनान्यान्यादृशं सिध्यति यथा चरव्यासंकुला: तत्र वाच्यमित्र:
पूर्वविप्रतिषेध: परत्वात् क्वस्येष्ट वाच्यत्वे वा तत्सामर्थ्यात् नो भयत्र विभाषा त्वं। यत्र तु न [illegible] वचनारंभ:
यथा तु भये देवमनुष्या: तत्र प्रत्ययोत्तरत्वाद्दिरूपं उपायं तस्मात्स्येयं। एवं रीत्या भाष्यप्रदर्शितमा
र्गद्वयेन संचरन् लक्ष्यस्य साधुत्वासाधुत्वे निश्चनुयात् इति॥ इतो प्यधिकं प्रकाशं तत्रैवा सर्वनाम
तु स्थानप्रकरणस्य सौरवरविवृत्ति संग्रहे सौरीसापरिभाषेन्दु सौरवरविवृत्ति संग्रहे तु रीत्या वा अवसेयं
नैवमात्तं परत्वात् इति॥ अनंतरस्यापि विधिर्वा भवति प्रतिषेधो वा [illegible] व्यवहितस्य निषेधोन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवतिइत्येतत्तात्पर्यं वृत्तिषेध्यस्यैवमानत्वात् । एवं येन नाम्नातिव्याप्यस्य अनाप्रामस्य नि
षेधो नइत्येतत्तात्पर्यं वस्तुपिमानत्वात् ॥ एवं अणावक्र मर्दाद्दित्तस्य विषये एवं विप्रत्तिषेध्यवच्य
नं आ-चार्यहेङ्गियानुरोधेन कृतं इतिबोध्यं ॥ इतिमत्वा कृतं किंचित्त्स्वा तेत्र्यक्षं म्पतां बुधैः उ
तिप्राचीनयाग्रा-यासनव्येः सपूलीकृता ॥ इति शेखरविवृत्तिसंग्रहे णेरणौसूत्रविव
तिसंग्रहः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(नं. ८६)

घेरणौ इतिसूत्रस्यशेखरविवृतिसंग्रहस्समाप्तः
॥घेरणौ इतिसूत्रस्य समा॥

KKSU LIBRARY
RAMTEK
441 106
M-1904
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 15:40
,TRANSFERRED=2020/10/21 at 15:45:39
,PAGES=34
,TYPE=STD
,NAME=S0004319
,Book Name=M-1904-SHABDENDUSHEKHAR VITRITI SANGRAH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection